तदा त्रयोदशे श्राद्धं कार्य्यन्तदधिकं भवेत्"। तत्राप्यशक्तौ प्रथममासस्यैकाह एव द्वादशमासिकसहितसपिण्डीकरणकालः। "मुख्यं श्राद्धं मासिमासि अपर्य्याप्तावृतुं प्रति। द्वादशाहेन वा कुर्य्यादेकाहे द्वादशाथ वा" इति मरीचिवचनात्। अपर्य्याप्तौ अशक्तौ ऋतुर्मासद्वयम्। अत्र कल्पे षष्ठमासिकदिने पञ्चममासिकं कृत्वा प्रथमषाण्मासिकं कार्य्यं तदाद्युत्कर्षन्यायात्। न तु तत् पूर्व्वं षाण्मासिकं व्युत्क्रमापत्तेर्न च पञ्चममासिकमपि पूर्व्वदिने मृततिथ्यभावात् एवमेव वाचस्पतिमिश्रः। अपकर्षनिमित्तमाह व्याघ्रः "आनन्त्यात् कुलधर्म्माणां पुंसाञ्चैवायुषः क्षयात्। अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते"। एतच्च द्वादशाहपदं शावाशौचान्ततृतीयदिनमात्रपरमिति प्राचीनमैथिलाः, अजहत्स्वार्थलक्षणया स्वजात्युक्ताशौचान्ततृतीयदिनमात्रोपलक्षकमिति श्राद्धप्रदीपश्राद्धचिन्तामणी। तदुभयमप्ययुक्तं "द्वादशाहेन वा कुर्य्यात्" इति मरीचिवचन "द्वादशाहे श्राद्धं कृत्वा त्रयोदशेऽह्नि वा कुर्य्यात्" इति विष्णुवचनाभ्यामेकवाक्यतया द्वादशदिनपरत्वात्। कुलधर्म्माणामिति कुलधर्म्मज्योतिरागमादिसिद्धानन्तरभाविनाशपरचक्रभयोत्पन्नस्वदेशगमनादिभिर्निमित्तैरशौचापगमे द्वादश दिनानि षोड़शश्राद्धापकर्षकाल इति शूलपाण्युपाध्यायव्याख्यानात् मरीचिनैव "एकाहे द्वादशाथ वेति" सामान्यत एव एकाहविधानाच्च। अतएव एकाहापेक्षया प्राशस्त्याभिधानमपि सङ्गच्छते अतएव प्रथममासस्य एकाह एव द्वादशमासिकसहितसपिण्डीकरणकाल इति श्राद्धविवेकः। अत्र यानि एकाहकर्त्तव्यतया द्वादशमासिकश्राद्धान्युक्तानि तानि शूद्रेणापि आद्यमासिकदिन एव कार्य्याणि नत्वाद्यमासिकं कृत्वा तत्परदिने एकादश मासिकानीति ज्ञेयम्। एवञ्च तेषामपकर्षे तन्मध्ये तदन्तकाले च कर्त्तव्यतया षाण्मासिकद्वयसपिण्डीकरणापकर्षः सिद्ध्यतीति सुधीभिर्भाव्यम्। यदहर्वा वृद्धिरिति वृद्धिराशास्यमानं पुंसवनादि। आपद्येत आसन्ना भवति तद्दिनेऽपि सपिण्डीकरणम्। तथाहि "प्रागावर्त्तनादह्नः कालं विद्यात्" इति गोभिलगृह्यसूत्रेण पुंसवनादिकस्य पूर्व्वाह्णीययामद्वयाभ्यन्तरे विधानात् सपिण्डीकरणस्य चापराह्णे विधानात्तयोः कालयोरबाधाय वृद्धिपूर्व्वदिने अपकर्षः। ननु सपिण्डीकरणस्यापराह्णिककत्वे किं प्रमाणमिति चेत् "अपराह्णे तु पैतृकम्" इत्युत्सर्गवचनम्।

किञ्च "यद्यप्यदन्तकः पूषा पैष्टमत्ति सदा चरुम्। अग्नीन्द्रेश्वरसाधर्म्यात्तण्डुलोऽत्र विधीयते" इति छन्दोगपरिशिष्टवचने यथा बहूनामनुरोधात्तण्डुलचरुर्नैकानुरोधात् पैष्टचरुः "विरुद्धधर्म्मसमवाये भूयसां स्यात् सधर्म्मकत्वम्" इति जैमिनिसूत्रात्। तद्वदत्रापि बहुदेवताकपार्व्वणानुरोधात् "एकोद्दिष्टविधानेन कार्य्यन्तदपि पार्थिव!" इति विष्णुपुराणीयमेकोद्दिष्टांशे तदितिकर्त्तव्यतापरं न तु तत्कालपरम्। तथा च परिशिष्टप्रकाशधृतम् "श्राद्धद्वयमुपक्रम्य कुर्व्वीत सहपिण्डताम्। तयोः पार्व्वणवत् पूर्व्वमेकोद्दिष्टमथापरम्" इति। एवञ्च शुद्धितत्त्वलिखितस्यमन्तकोपाख्यानवत् वृद्धिं निश्चित्य कृतं सपिण्डीकरणं तदानीं विघ्नेन वृद्ध्यभावेऽपि वृद्ध्यारम्भकालान्तरं पूर्णसंवत्सरं वा प्राप्य पितृत्वप्रापकमिति न सपिण्डनान्तरम्। अत्र "श्वःकर्त्तास्मीति निश्चित्य दाता विप्रान्निमन्त्रयेत्।" इतिवन्निश्चित्येति उत्कटकोटिकसम्भावनोपलक्षणं भविष्यन्निमित्तस्य कर्म्मणः प्रत्यूहार्हत्वात्। एवञ्च वृद्धिश्राद्धं यदर्थं कृतं तत् कर्म्म चेत् विघ्नात्तद्दिने न क्रियते तदा दिनान्तरे तत् कर्म्मणि क्रियमाणे तदङ्गत्वात् पुनर्वृद्धिश्राद्धं कर्त्तव्यमेव। "प्रधानस्याक्रिया यत्र साङ्गं तत्क्रियते पुनः। तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत्क्रिया"। इति छन्दोगपरिशिष्टेन साङ्गकरणाभिधानात्। हेमाद्रिधृतं "पूर्णे संवत्सरे श्राद्धं षोड़शं परिकीर्त्तितम्। तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते।" अत्र पूर्णसंवत्सरक्रियमाणश्राद्धाद् यथोभयनिर्व्वाहः तथापकृष्टसपिण्डनादप्युभयनिर्व्वाहान्न पूर्णसंवत्सरे आब्दिकान्तरं कार्य्यम्"। तत्रायं विशेषः तत्रोक्तो यथा "एवञ्च पार्व्वणे प्रागुक्तवचनेन शेषद्रव्येण पिण्डविधानात् तद्विकृतावपि सपिण्डीकरणे तन्नियमात् यद्यपि शेषाभावेऽपि पिण्डनिर्वृत्तिरायाति तथापि "यथोक्तवस्त्वसंप्राप्तौ ग्राह्यं तदनुकारि यत्। यवानामिव गोधूमा व्रीहीणामिव शालयः" इति छन्दोगपरिशिष्टवचनात् "मुख्याभावेऽपि प्रतिनिधिः शास्त्रार्थः" इति न्यायाच्च मध्वाद्यभावे गुड़ादिग्रहणवत् द्रव्यान्तरेणापि पिण्डदानं शेषद्रव्यनियमस्तु तत्सम्भवे द्रव्यान्तरत्यागाय। अन्यथा तदङ्गाभावे कर्म्मवैगुण्यं स्यात् "सहपिण्डक्रियायाम्" इति मनूक्तेः पिण्डस्य प्रेतपिण्डेन सह मिश्रीकरणं यत्रेति सपिण्डीकरणसमाख्यासिद्ध्यर्थं सुतरां तत्र